"रसं दद्यात्सोनस्य अन्यैर्व्वा तैलसंयुतैः ।
पलद्वय प्रथमेऽह्नि एकैकपलवर्द्धितः ॥
यावद्धि शान्तिपूर्णा स्यात्तन्मात्रेत्युत्तमाश्वके
मध्यमे चतुर्द्दश स्युरधमेऽष्टपलानि च ॥
शरन्निदाघयोर्न्नैव देयो नैव तु दापयेत् ।
तैलेन वातिके पित्ते शर्कराज्यपयोऽन्वितैः ॥
कटुतैलैः कफे व्योषैः कफे मुद्गान् कुलत्थकान् ।
शालिषष्टिकदुग्धाशी हयोऽखिलजुगुप्सितः ॥
पक्वजम्बूनिभो हेमवर्णः श्रेष्ठश्च गुग्गुलुः ।
अर्द्धप्रहरणे सूर्य्ये गुग्गुलुं पाययेद्धयम् ॥
भोजने पायसं दुग्धं नाडीक्लिस्रस्तनोति सः ।
विकाले भोजयेदश्वं शाल्यन्नं वातुले ददेत् ॥
मांसानाञ्च रसैः पित्ते मधुमुद्गरसाज्यकैः ।
कफे मुद्गान् कुलत्थान् वा कटुतिक्तान् शृतान् हये ॥
व्याधिते व्याधिते श्वासे त्रिदोषादौ तु गुग्गुलुम् ।
घासैर्द्दूर्व्वा सर्व्वरोगे प्रथमेऽह्नि पलं ददेत् ॥
विवर्द्धयेत् ततो वर्षमेकादिपलपञ्चकम् ।
उत्तमे स्याच्च चत्वारि त्रीणि मध्यजघन्ययोः ॥
पानेन भोजनेनैव अशीतिपलकं वरे ।
मध्ये षष्टिश्चाधमेऽथ चत्वारिंशच्च भोगिषु ॥
व्रणे कुष्ठेषु खञ्जेषु त्रिफलाक्वाथसंयुतम् ।
मन्दाग्नौ शोथरोगे च गवां मूत्रेण योजयेत् ॥
वातपित्तोल्वणे व्याधौ गोक्षीरघृतसंयुतम् ।
देयं क्षषाणां पुष्ट्यर्थं माषैर्यन्नञ्च भोजनम् ॥
सुपिष्टायाः प्रदातव्यं गुडूच्याः पलपञ्चकम्
प्रभाते घृतसंयुक्तं शरद्ग्रीष्मेषु वाजिनाम् ॥
रोगघ्नं पुष्टिदञ्चापि बलतेजोविवर्द्धनम् ।
तदेवाश्वाय दद्याद्वै क्षीरयुक्तमथापि वा ॥
गुडूचीकल्कयोगेन शतावर्य्यश्वगन्धयोः ।
चत्वारि त्रीणि मध्यस्य जघनस्य पलानि हि ॥
अकस्माद्दृथव वाहानामेकरूपं यदा भवेत् ।
म्रियते च तदा क्षिप्रं उपसर्गं तमादिशेत् ॥
होमाद्यैरन्नया विप्रभोजनैर्बलिकर्म्मणा ।
शान्त्योपसर्गशान्तिः स्याद्धरीतक्यादिकल्पतः ॥
हरीतकी सगोमूत्रा तैलेन लवणान्विता ।
आदौ पञ्च ततः पञ्चवृद्ध्या पूर्णा शतावधि ।
उत्तमाश्वे शतं प्रोक्तमशीतिः षष्टिरुत्तरे ॥*॥
गजायुर्व्वेदमाख्यास्ये उक्ताः कल्पा गजे हिताः ।
गजे चतुर्गुणा मात्रा ताभिर्गजरुगर्द्दनम् ॥
गजोपसर्गव्याधीनां शमनं शान्तिकर्म्म च ।
पूजयित्वा सुरान् विप्रान् ब्राह्मणे कपिलां ददेत् ॥
दन्तिदन्तद्वये मालां विबध्नीयादुपोषितः ।
मन्त्रणं मन्त्रिता वेद्यो वचासिद्धार्थकामले ॥
सूर्य्याद्याः शिवदुर्गाश्रीर्विष्णुता रक्षसां गणाः ।
बलिं दद्याच्च भूतेभ्यः स्नापयेच्च चतुर्घटैः ॥
भोजनं मन्त्रितं दद्यात् भस्मनोद्भनयेद्गजम् ।
भूतौ रक्षा शुभा मेध्या वारुणी रक्षसां सदा ॥
त्रिफला पञ्चकोले च दशमूलं विडङ्गकम् ।
शतावरी गुडूची च निम्बवासककिंशुकाः ॥
गजरोगविनाशाय प्रोक्तः कल्कः कषायकः ।
आयुर्व्वेदो गजाश्वानामुक्तः संक्षेपसारतः ॥"
इति गारुडे हयायुर्व्वेदः २०७ अध्यायः ॥
युक्तिकल्पतरूक्तहयपरीक्षा घोटकशब्दे द्रष्टव्या ॥ * ॥ हये वर्णनीयानि यथा । वेगः १ शौन्नत्यम् २ तेजः ३ सल्लक्षणस्थितिः ४ खुरोत्खातरजः ५ रूपम् ६ जातिः ७ गतिविचित्रता ८ । इति कविकल्पलता ॥ * ॥ अथ हयशकुनः ।
"हेषारवं मुञ्चति वामतो यः
क्षुसक्षितिर्दक्षिणपादघातैः ।
कण्डूयते दक्षिणमङ्गभाग
तुङ्गं तुरङ्गः स पदं ददाति ॥"
इति वसन्तराजे हयशकुनः १३ वर्गः ॥

हयकातरा, स्त्री, (हयः कातरो यस्याः ।) अश्वकातरावृक्षः । घोड़काथरा इति हिन्दी भाषा ॥

हयकातरिका, स्त्री, (हयकातरा एव । स्वार्थे कन् । टाप् अत इत्वम् ।) अश्वकातरावृक्षः । घोड़काथरा इति हिन्दी भाषा । यथा,—
"कातरा हयपर्य्यायैः कातरान्तैः प्रकीर्त्तिताः ।
अश्वकातरिका तिक्ता वातघ्नी दीपनी परा ॥"
इति राजनिर्घण्टः ॥

हयगन्धं, क्ली, (हयस्येव गन्धो यस्य ।) काचलवणम् । इति राजनिर्घण्टः ॥ (विवरणमस्य काचलवणशब्दे ज्ञातव्यम् ॥)

हयगन्धा, स्त्री, (हयस्येव गन्धो यस्याः ।) अश्वगन्धा । इति रत्नमाला ॥ (अस्याः पर्य्यायो यथा,—
"गन्धान्ता वाजिनामादिरश्वगन्धा हयाह्वया ।
वराहकर्णी वरदा बलदा कुष्ठगन्धिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ अजमोदा । इति राजनिर्घण्टः ॥

हयग्रीवः, पुं, (हयस्य ग्रीवा इव ग्रीवा यस्य ।) मधुकटभहृतवेदोद्धारार्थं विष्णोरवतारविशेषः । तस्य रूपं यथा,—
"सुनासिकेन कायेन भूत्वा चन्द्रप्रभस्तदा ।
कृत्वा हयशिरः शुभ्रं वेदानामालयं प्रभुः ॥
तस्य मूर्द्धा समभवत् द्यौः सनक्षत्रतारका ।
केशाश्चास्याभवन्दीर्घा रवेरंशुसमप्रभाः ॥
कर्णावाकाशपाताले ललाटं भूतधारिणी ।
गङ्गा सरस्वती श्रोण्यौ भ्रुवावास्तां महोदधी ॥
चक्षुषी सोमसूर्य्यौ ते नासा सन्ध्या पुनः स्मृता ।
प्रणवस्त्वथ संस्कारो विद्युज्जिह्वा च निर्म्मिता ॥
दन्ताश्च पितरो राजन् सोमपा इति विश्रुताः ।
गोलोको ब्रह्मलोकश्च ओष्ठावास्तां महात्मनः ॥
ग्रीवा चास्याभवद्राजन् कालरात्रिर्गुणोत्तरा ।
एतद्धयशिरः कृत्वा नानामूर्त्तिभिरावृतम् ॥"
इति महाभारतम् ॥*॥
(हयग्रीवदैत्यवधार्थमेव भगवान् हयग्रीवमूर्त्तिरभवत् । इति देवीभागवतमतम् ॥ अस्य विवरणन्तु तत्रैव १ स्कन्धे ५ अध्याये द्रष्टव्यम् ।) विष्णुवध्यदैत्यविशेषः । इति हेमचन्द्रः ॥ स च कल्पान्ते ब्रह्मणि प्रसुप्ते वेदं हृतवान् । तद्वेदोद्धारणार्थं विष्णुना मत्स्यावतारेण स हतः । इति केचित् ॥ * ॥ अपि च ।
"वृद्धगङ्गाजलस्यान्तस्तीरे ब्रह्मसुतस्य च ।
विश्वनाथाह्वयो देवः शिवलिङ्गसमन्वितः ।
विश्वदेवो महादेवो योनिमण्डलरूपिणी ॥
हयग्रीवेण युयुधे तत्र देवो जगत्पतिः ।
हयग्रीवं यत्र हत्वा मणिकूटं तथागमत् ॥"
इति कालिकापुराणे ८२ अध्यायः ॥

हयग्रीवहा, [न्] पुं, (हयग्रीवं हन्तीति । हन् + क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥

हयग्रीवा, स्त्री, दुर्गा । यथा,—
"नारसिंही हयग्रीवा हिरण्याक्षविनाशिनी ।"
इति तस्याः सहस्रनामस्तोत्रम् ॥

हयङ्कषः, पुं, (हयं उच्चैःश्रवसं कषतीति । कष + खच् ।) मातलिः । स तु इन्द्रसारथिः । इति त्रिकाण्डशेषः ॥

हयनं, क्ली, (हयति गच्छत्यनेनेति । हय + ल्युट् ।) कर्णीरथः । इत्यमरः ॥ तस्य रूपान्तरं ड्डयनम् । इति तट्टीकायां भरतः ॥

हयपुच्छी, स्त्री, (हयस्य पुच्छमिव आकृतिर्यस्याः । ङीष् ।) माषपर्णी । इत्यमरः । २ । ४ । १३८ ॥

हयप्रियः, पुं, (हयस्य प्रियः ।) यवः । इति हेमचन्द्रः ॥ (यवशब्देऽस्य गुणादयो ज्ञेयाः ॥)

हयप्रिया, स्त्री, (हयस्य प्रिया ।) अश्वगन्धा । खर्ज्जूरी । इति राजनिर्घण्टः ॥

हयमारः, पुं, (हयं मारयतीति । मृ + णिच् + अण् ।) करवीरः । इति राजनिर्घण्टः ॥

हयमारकः, पुं, (हयं मारयतीति । मृ + णिच् । ण्वुल् ।) करवीरवृक्षः । इत्यमरः । २ । ४ । ७६ ॥

हयमारणः, पुं, (हयं मारयतीति । मृ + णिच् + ल्युः ।) अश्वत्थवृक्षः । इति शब्दचन्द्रिका ॥

हयवाहनः, पुं, (हयो वाहनमस्य ।) रेवन्तः । स तु सूर्य्यपुत्त्रः । इति हेमचन्द्रः ॥ कुबेरः । इति केचित् ॥

हयवाहनशङ्करः, पुं, रक्तकाञ्चनः । इति शब्दचन्द्रिका ॥

हयशाला, स्त्री, (हयस्य शाला ।) अश्वालयः । यथा, मात्स्ये । २१७ । १९—२३ ।
"गवां स्थानं तथैवात्र तुरगाणान्तथैव च ।
उत्तराभिमुखा श्रेणी तुरगाणां विधीयते ॥
दक्षिणाभिमुखा वाथ परिशिष्टास्तु गर्हिताः ।
तुरगास्तु तथा धार्य्याः प्रदीपैः सर्व्वरात्रिकैः ॥
कुक्कुटा वानराश्चैव मर्कटाश्च नराधिप ! ।
धारयेदश्वशालायां सवत्सां धेनुमेव च ।
अजाश्च धार्य्या यत्नेन तुरगाणां हितैषिणा ॥
गोगजाश्वादिशालासु तत्पुरीषस्य निर्गमम् ।
अस्तं गते न कुर्व्वीत देवदेवे दिवाकरे ॥"

हयशीर्षः, पुं, (हयस्य शीर्षं शीर्षं यस्य ।) विष्णुः । यथा,—
"ततो जगाम हृष्टोऽब्धी द्रष्टुं वाजिमुखं प्रभुम् ।